National Journal of
Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2019; 1(23): 53-54
© 2019 NJHSR
www.sanskritarticle.com

आर.प्रवीण कुमारः
शोधच्छात्रः,संस्कृत विभागः,
राष्ट्रियसंस्कृतविद्यापीठम्, तिरूपतिः

Correspondence:
आर.प्रवीण कुमारः
शोधच्छात्रः,संस्कृत विभागः,
राष्ट्रियसंस्कृतविद्यापीठम्, तिरूपतिः

# धनुर्भङ्गमहाकाव्यस्य साहित्यप्राशस्तिः

**आर. प्रवीण कुमार**

**आमुखम्**

इह खलु जगति अर्थानां प्रमित्यै प्रत्यक्षम्, अनुमानम्, उपमानम्, शब्द इत्यादीनि बहूनि प्रमाणानि अङ्गीकृतानि सन्ति शास्त्रकारैः । तत्र शब्द इति प्रमाणं यदि न स्यात् तर्हि सर्वं जगदिदम् अन्धे तमसि निमज्जेत्, तदाह दण्डी –

**इदमन्धं तम: कृत्स्नं जायेत भुवनत्रयम् ।**
**यदि शब्दाह्वयं ज्योतिरासंसारं न दीप्यते ॥**

एतादृश: शब्द: यदा श्रूयते तदा नियमेन कश्चिदर्थ: प्रतीयते । यदा च कश्चिदर्थ: प्रतीयते तदा नियमेन तद्वाचक: शब्द: प्रतिभाति । अत एव अर्थे शक्यतावच्छेदकस्येव शब्दस्यापि विशेषणतया भानमिति शब्दविद:, तदुक्तं भर्तृहरिणा –

**न सोऽस्ति प्रत्ययो लोके य: शब्दादनुगमादृते ।**
**अनुविद्धमिव ज्ञानं सर्वं शब्देन भासते ॥**

एवं शब्दार्थयो: अविनाभावस्य सत्त्वादेव महाकविना कालिदासेन पार्वतीपरमेश्वरयो: उपमानत्वेन वागर्थयो: निर्देश: कृत: नान्ययो: कयोश्चित् ।यद्यपि शब्दार्थयोः साहित्यं सर्वेषु वाक्येषु साधारणम् तथापि काव्यगतेषु वाक्येषु तद्विलक्षणमेव । तत्र यादृशं साहित्यं प्रतीयते तादृशं साहित्यमन्यत्र सुतरां नोपलभ्यते । अत्र हि वाक्येषु विलक्षणं सादृश्यं वर्तते । वैलक्षण्यं च शब्दानाम् अलङ्कृतत्वेन व्यञ्जकत्वेन च अर्थानां तु कल्पितत्वेन व्यञ्जकत्वेन च । इदं वैलक्षण्यं मनसिकृत्यैव भामहादय आलङ्कारिका: काव्यं नाम सहितौ शब्दार्थौ इत्याचचक्षिरे। एवं लक्षणलक्षितानि सन्ति नैकानि काव्यानि। तत्र वर्णयिष्यमाणं धनुर्भङ्गकाव्यमपि अन्यतमम्।

श्रीमता उमापदचट्टोपाध्यायमहोदयेन विरचितं धनुर्भङ्गकाव्यम् अनुसन्धानयोग्यविषयत्वेन प्रथाम् प्राप्तमेकम् महाकाव्यम् भवति। रामायणाद् किञ्चनेतिवृत्तं प्रसिद्धमुद्धृत्य अध्येतॄणामत्यन्तोपयोगितयाचार्येण श्रीमता उमापदचट्टोपाध्यायमहोदयेन काव्यमिदमक्षरविन्यस्तम्।

**कविपरिचितिः**

पश्चिमबङ्गप्रदेशस्य बर्द्धमानमण्डलान्तर्गतकाटोयाप्रमण्डलदक्षिणसीमायां खडीनद्याः उत्तरदिशि वर्तमाने जामडा नाम ग्रामे ग्रामीणगुरुदासचट्टोपाध्यायमहाशयस्य सहधर्मिण्या गुरुपदाश्रिताया लोकोत्तरं गताया नीरदवरेणीदेव्याः अष्टमगर्भसम्भूतपुत्रः श्रीउमापदचट्टोपाध्यायमहोदयः। अस्य पिता तावत् स्वधर्मनिष्ठसत्याश्रयिनित्य-नारायणसेवापरायणः परोपकारको व्यक्तित्ववान् दुःस्थात्मीयवर्गसमाश्रयः कृषिनिर्भर-ब्राह्मण आसीत्।

अस्य माता मातृदेवो भव इति वैदिकशिक्षोपदेशमन्तर्निधाय सम्पदि विपदि च मातुराज्ञावहत्वेन स्वं समर्प्य तदाशीर्वादेन प्रा तःस्मरणीयवरणीयचरितस्य बन्दोपाधि-केश्वरचन्द्रविद्यासागरमहात्मनो मातृदेवी करुणामयी साक्षाद्भगवतीव भगवतीदेवीसदृशी दयावती परदुःखकातरा अतिथ्यभ्यागतस्वाम्यपत्यपरिवाराणाम् सुखस्वाच्छन्द्यवि-धाने नितराम् निरलसगृहधर्मदेवसेवाव्यापृता भोगेष्वनुत्सुका सरला कोमलहृदया समुदारचित्ता स्वपरजनेषु स्नेहशीला ग्रामग्रामान्तरे छोटमा इत्यभिहिता तदीया मातृदेवी आसीत्।

अस्य आचार्यः स्वामिजगन्नाथाश्रमपादाः कांकोशंकरमठस्य काशीशंकरमठस्य च प्रतिष्ठातारः। महाविदग्धसन्यासिनः, सिद्धयोगिनः, प्रख्यातज्योतिर्विदः, सर्वशास्त्रनिष्णाताः, भविष्यद्द्रष्टारो भूतपूर्वतारकेश्वरमठाधीशाः, नेताजी सुभाषचन्द्रबसुः महामनस्वी श्यामाप्रसादमुखोपाध्यायः इत्यादिदेशवरेण्यनेतृणाम् नामावतारसीतारामोकारनाथः, हरिहरानन्दसरस्वती, ब्रह्मलीनतारानन्दब्रह्मचारी इत्यादीनाम् प्रमुखानाम् महापुरुषाणाम् श्रद्धाभाजनानि आसन्। सर्वत्र मठेषु संस्कृतविद्यालयप्रतिष्ठातारः, वैदिकसनातनधर्मगुरुः भक्तियोगमधुमञ्जरीप्रमुख - गम्भीर-ग्रन्थरचयितारश्च आसन्।

शरत्कमलन्यायतीर्थमहोदयान्तेवासितया सप्तवर्षाणि व्याकरणसाहित्याध्ययनम्, तेन व्याकरणतीर्थः काव्यतीर्थः इति च उपाधिद्वयम् प्राप्तम्। अनेन पीताम्बर-वेदाचार्य्यमहोदयान्तेवासिरूपेण वर्षत्रयम् सस्वरवेदा-ध्ययनम् कृतम्। सामवेदोपाधिपरीक्षामुत्तीर्य वेदतीर्थेति उपाधिश्चानेन प्राप्तः।

**धनुर्भङ्गमहाकाव्यस्य व्युत्पत्तिः**

धनुर्भङ्गमहाकाव्यं महाकाव्यलक्षणसमन्वितं भवति। धनोर्भङ्गमधिकृत्य निर्मितं काव्यं धनुर्भङ्गकाव्यमिति व्युत्पत्त्या काव्येस्मिन् इतिवृत्तत्वेन आदत्तो विषयः धनोर्भङ्गः इति ज्ञायते। केन कृतोयं धनुर्भङ्गः इति ज्ञिज्ञासायां काव्याध्यायनवेलायां ज्ञायते यत् धर्मस्य विग्रहवतः श्रीरामचन्द्रस्य विवाहस्वयंवरवेलायां कृतं धनुर्भङ्गमेवाधिकृत्य निर्मितम् काव्यमिदमिति।

काव्ये प्रतिपादिताः विषयाः काव्येस्मिन् त्रयोदश सर्गाः सन्ति। तत्र -

**आसीने कनकासने दशरथेऽयोध्यापुरीं शासति**
**विश्वामित्रमहातपा मुनिवरो धर्मीय तत्रागतः ।।**
**संपश्यंच्छुचिशुभ्रसात्त्विकतनुं सन्त्रस्तसम्राट् तत**
**उत्थायात्मनिवेदनेन महतो व्यज्ञापयत् स्वागतम् ।।**

इति श्लोकादारभ्य

**कामंधनुः प्रशमितं जननान्तरेऽपि**
**निर्मोहरामचरिताकंनधर्मतः स्यात् ।।**
**तत्प्रार्थये रघुवरं लषणं च सीताम्**
**नान्या स्पृहास्तु यशसेऽथ धनाय काचित् ।।**

इति श्लोकपर्यन्तम् प्रथमसर्गे विश्वामित्रस्य अयोध्यागमनम्, दशरथविश्वामित्रयोः संलापः, रामलक्ष्मणाभ्यां ततो गमनम् च विद्यते। द्वितीयसर्गे शरवर्णनम्, यात्रापथवर्णनम्, कामाश्रमवर्णनम्, विन्ध्यशासनम् च विद्यते । तृतीयसर्गे कामाश्रमनिवासिनाम् , साधूनां वटुकानां जीवनचर्यावर्णनम् च विद्यते। चतुर्थसर्गे आश्रमिकाणां प्रशंसा, सुकेतुयक्षकथा, सुन्दस्य मरणम् च विद्यते।पञ्चमसर्गे ताडकाराक्षसीवधवर्णनं विद्यते। षष्ठसर्गे विश्वामित्राद् अमोघशस्त्राणि रामलक्षणाभ्यां लब्धानि, तत् प्रयोगसंहारशिक्षणम् च च विद्यते। सप्तमसर्गे सिद्धाश्रमवर्णनम्, घोरं तपस्यतः कश्यपस्य पुत्रलाभः च विद्यते। अष्टमसर्गे नारदकश्यपसंलापः, नारदस्याभिमाननिवृत्तिः, भक्तसुदासोपाख्यानम् , वामनोपनयनम् , वलेर्दर्पविनाशनम् च विद्यते। नवमसर्गे सिद्धाश्रमाद् राक्षसानां चिराय विताडनम्, विश्वामित्रस्य निर्विघ्नेन यज्ञसमापनम् च विद्यते।दशमसर्गे अहल्योद्धारः च विद्यते। एकादशसर्गे गङ्गामाहात्म्यवर्णनं द्वादशसर्गे गङ्गापारकथा, त्रयोदशे सर्गे रामादीनां मिथिलागमनम्, सीतारामयोः पूर्वरागः, धनुर्भङ्गः, रामादीनां विवाहवर्णनम् इति च विषयाः मालायां यथा मौक्तिकानि गुम्फितानि तथा काव्येऽस्मिन् रचिताः सन्ति।

**काव्यस्यास्य साहित्यप्रशस्तिः**

महाकाव्यलक्षणानि समान्यपि निवेश्य काव्यमिदं रचितं भवति। अत्र काव्ये प्रतिसर्गं श्लोकाः विविधैः वृत्तैः निबद्धा भवन्ति।सर्गान्ते तत्सर्गगतं वृत्तं परिवर्त्तयति च।एवं काव्ये बहुत्रापि दीर्घसमासाः नैके अलंकाराश्च गुम्फिताः सन्ति।

**उपसंहारः**

श्रीमता उमापदचट्टोपाध्यायमहोदयेन विरचितं धनुर्भङ्गकाव्यमिदं छात्राणां कृते सम्यगुपकरिष्यते इति विषये नास्ति संशयलोशोपि इति मम काव्यपरिशीलने बुद्धमेव इत्युक्त्वा विरतो भवामि।

इति शम्